॥ ओ३म् ॥

❋ अथ पञ्चदशाऽध्यायारम्भः ❋

ओं विश्वा॑नि देव सवितर्दुरि॒तानि॒ परा॑ सुव । यद्भ॒द्रं तन्न॒ऽआ सु॑व ॥ १ ॥

य० ३० । ३ ॥

परमेष्ठी कुत्सः । रुद्रः=राजा । आर्षी गायत्री । षड्जः ॥

अथ राजधर्म उपदिश्यते ॥

अब सोलहवें अध्याय का आरम्भ करते हैं ।

इसके प्रथम मन्त्र में राजधर्म का उपदेश किया है ॥

नम॑स्ते रुद्र म॒न्यव॑ऽ उ॒तो त॒ऽ इष॑वे॒ नमः॑ । बा॒हुभ्या॑मु॒त ते॒ नमः॑ ॥ १ ॥

पदार्थः—(**नमः**) वज्रम् । नम इति वज्रना० ॥ निघं० २ । २० ॥ (**ते**) तवोपरि (**रुद्र**) दुष्टानां शत्रूणां रोदयितः । कतमे ते रुद्रा इति दशेमे पुरुषे प्राणा एकादश आत्मा । एकादश रुद्राः कस्मादेते रुद्रा यदस्मान्मर्त्याच्छरीरादुत्क्रामन्त्यथ रोदयन्ति यत्तद्रोदयन्ति तस्माद्रुद्राः ॥ इति शतपथब्राह्मणे ॥ रोदेर्णिलुक् च । अनेनोणादिगणसूत्रेण रोदिधातो रक् प्रत्ययो णिलुक् च (**मन्यवे**) क्रोधयुक्ताय वीराय (**उतो**) अपि (**ते**) तव (**इषवे**) इष्णात्यभीक्ष्णं हिनस्ति शत्रून् येन तस्मै (**नमः**) अन्नम् । नम इत्यन्नना० ॥ निघं० २ । ७ । (**बाहुभ्याम्**) भुजाभ्याम् (**उत**) अपि (**ते**) तव (**नमः**) वज्रम् ॥ १ ॥

प्रमाणार्थ—(**नमः**) वज्रम् । 'नमः' पद निघं० २ । २० में वज्र-नामों में पठित है । (**रुद्र**) शतपथ ब्राह्मण में कहा है कि—वे रुद्र कौन से हैं? ये रुद्र दश हैं जो पुरुष में प्राण हैं, ग्यारहवाँ आत्मा है । इस प्रकार ग्यारह रुद्र हैं । ये रुद्र क्यों कहलाते हैं? इसलिए कि जब ये प्राणी के शरीर से निकलते हैं तब रुलाते हैं, जिससे रुलाते हैं इसलिए रुद्र कहलाते हैं । 'रोदेर्णिलुक् च' (उणा० २ । २२) इस उणादि सूत्र से 'रोदि' धातु से रक् प्रत्यय और णिच् का लुक् है । (**नमः**) अन्नम् । 'नमः' पद निघं० २ । ७ में अन्न-नामों में पठित है ।

अन्वयः—हे रुद्र ! ते मन्यवे नमोस्तु । उतो इषवे ते नमोऽस्तु । उत ते बाहुभ्यां नमोऽस्तु ॥ १ ॥

सपदार्थान्वयः—हे रुद्र ! दुष्टानां शत्रूणां रोदयितः ! **ते** तवोपरि **मन्यवे** क्रोधयुक्ताय वीराय **नमः** वज्रम् **अस्तु** ।

उतो अपि **इषवे** इष्णात्यभीक्ष्णं हिनस्ति शत्रून् येन तस्मै **ते** तव **नमः** अन्नम् **अस्तु** ।

उत अपि **ते** तव **बाहुभ्यां** भुजाभ्यां **नमः** वज्रम् **अस्तु** ॥ १६ । १ ॥

भाषार्थ—हे (रुद्र) दुष्टों को रुलाने वाले राजन् ! (ते) तुझ पर (मन्यवे) क्रोध करने वाले वीर के लिए (नमः) वज्र (अस्तु) हो ।

(उतो) और—(इषवे) बार-बार शत्रुओं की हिंसा करने वाले (ते) आपके लिए (नमः) अन्न (अस्तु) हो ।

(उत) और—(ते) तेरी (भुजाभ्याम्) भुजाओं के लिए (वज्रम्) वज्र=बल (अस्तु) हो ॥ १६ ॥

[हे रुद्र !······ते **बाहुभ्यां नमोऽस्तु**, **उतो—इषवे ते नमोऽस्तु**]

भावार्थः—ये राज्यं चिकीर्षेयुस्ते बाहुबलं, युद्धशिक्षां, शस्त्रास्त्राणि च सम्पादयेयुः ॥ १ ॥

भावार्थ—जो राज्य करना चाहें वे बाहु-बल, युद्ध शिक्षा और शस्त्र-अस्त्रों को सिद्ध करें ॥

भा० पदार्थः—नमः=बलम् । इषवे=शस्त्रास्त्राय ।

अन्यत्र व्याख्यात—(**प्रश्न**) 'नमस्ते रुद्र मन्यवे'······इत्यादि वेद-प्रमाणों से शैवादि मत सिद्ध होते हैं, पुनः क्यों खण्डन करते हो ? (**उत्तर**) इन वचनों से शैवादि संप्रदाय सिद्ध नहीं होते क्योंकि 'रुद्र' परमेश्वर, प्राणादि वायु, जीव, अग्नि आदि का नाम है, जो क्रोधकर्त्ता रुद्र अर्थात् दुष्टों को रुलाने वाले परमात्मा को नमस्कार करना······चाहिए । (**सत्यार्थप्रकाश समु० ११**) ॥

भाष्यसार—**राजा कैसा होना चाहिए**—राजा रुद्र के समान शत्रुओं तथा दुष्टों को रुलाने वाला हो, शत्रु वर्ग पर विजय करने के लिए उत्तम वज्रादि अस्त्र-शस्त्रों वाला हो, जो वीर योद्धा शत्रुओं को मारने वाले हों, उनका अन्नादि से सदा सत्कार करने वाला हो और स्वयं भी भुजाओं में अमित बल रखने वाला हो । तब ही वह राज्य अच्छी प्रकार कर सकता है ॥ १६ । १ ॥

परमेष्ठी वा कुत्सः । **रुद्रः**=**शिक्षकः** ॥ आर्षी स्वराडनुष्टुप् । गान्धारः ॥

अथ शिक्षकशिष्यव्यवहारमाह ॥

अब शिक्षक और शिष्य के व्यवहार का उपदेश किया जाता है ॥

या ते॑ रुद्र शि॒वा त॒नूरघो॒राऽपा॑पकाशिनी । तया॑ नस्त॒न्वा॒ शन्त॑मया गिरि॑शन्ता॒भि चा॑कशीहि ॥ २ ॥

पदार्थः—(**या**) (ते) तव (**रुद्र**) दुष्टानां भयंकर श्रेष्ठानां सुखकर (**शिवा**) कल्याण-कारिणी (**तनूः**) शरीरं विस्तृतोपदेशनीतिर्वा (**अघोरा**) अविद्यमानो घोर=उपद्रवो यया सा (**अपापका-शिनी**) अपापान्सत्यधर्मान् काशितुं शीलमस्याः सा (**तया**) (नः) अस्मान् (**तन्वा**) विस्तृतया (**शन्तमया**) अतिशयेन सुखप्रापिकया (**गिरिशन्त**) यो गिरिणा=मेघेन सत्योपदेशेन वा शं=सुखं तनोति तत्सम्बुद्धौ । गिरिरिति मेघना० ॥ निघं० १ । १० ॥ (**अभि**) सर्वतः (**चाकशीहि**) भृशं कश्व पुनः पुनः शाधि । अयं कश-धातोर्यङ्लुगन्तः प्रयोगः । वा छन्दसीति पित्त्वादीट् ॥ २ ॥

प्रमाणार्थ—(**गिरिशन्त**) 'गिरि' पद निघं० १ । १० में मेघ-नामों में पठित है । (**चाक-शीहि**) यह 'कश' धातु का यङ्लुगन्त प्रयोग है । 'वा छन्दसि' (३ । ४ । ८८) सूत्र से पित् होने से ईट्-आगम है ॥

अन्वयः—हे गिरिशन्त रुद्र ! या ते तवाघोराऽपापकाशिनी शिवा तनूरस्ति तया शन्तमया तन्वा नस्त्वमभिचाकशीहि ।। २ ।।

सपदार्थान्वयः—हे **गिरिशन्त** यो गिरिणा=मेघेन सत्योपदेशेन वा शं=सुखं तनोति तत्सम्बुद्धौ **रुद्र** ! दुष्टानां भयङ्कर ! श्रेष्ठानां सुखकर ! **या ते**=**तवाघोरा** अविद्यमानो घोर=उपद्रवो यया सा **अपापकाशिनी** अपापान्=सत्यधर्मान् काशितुं शीलमस्याः सा **शिवा** कल्याणकारिणी **तनूः** शरीरं विस्तृतोपदेशनीतिर्वा **अस्ति**, **तया शन्तमया** अतिशयेन सुखप्रापिकया **तन्वा** विस्तृतया **नः** अस्मान् **त्वमभिचाकशीहि** सर्वतः भृशं कश्व=पुनः पुनः शाधि ।। १६ । २ ।।

भाषार्थ—हे (गिरिशन्त) गिरि अर्थात् मेघ वा सत्योपदेश से सुख को फैलाने वाले, (रुद्र) दुष्टों के लिए भयङ्कर एवं श्रेष्ठों के लिए सुखकारक शिक्षक ! (या) जो (ते) तेरी (अघोरा) उपद्रव रहित, (अपापकाशिनी) अपाप=सत्यधर्म को प्रकाशित करने वाली, (शिवा) कल्याणकारी (तनू) काया वा विस्तृत उपदेशनीति है, उससे—(शन्तमया) अत्यन्त सुख-प्रापक (तन्वा) विस्तृत उपदेश-नीति से (नः) हमें तू (अभिचाकशीहि) बार-बार उपदेश कर ।। १६ । २ ।।

[हे गिरिशन्त रुद्र !···शन्तमया तन्वा नस्त्वमभिचाकशीहि]

भावार्थः—शिक्षकाः शिष्येभ्यो धर्म्यां नीतिं शिक्षित्वा निष्पापान् कल्याणाचरणान् सम्पादयन्तु ।। १६ । २ ।।

भावार्थ—शिक्षक शिष्यों को धर्म-युक्त नीति सिखला कर उन्हें निष्पाप और कल्याणमय आचार वाले बनावें ।। १६ । २ ।।

भा० पदार्थः—रुद्र=शिक्षक ! । शन्तमया=धर्म्यया । तन्वा=नीत्या । अभिचाकशीहि=निष्पापान् कल्याणाचरणान् सम्पादय ।।

भाष्यसार—**शिक्षक का शिष्य के प्रति व्यवहार**—रुद्र=शिक्षक रुद्र की तरह दुःशील शिष्यों को दण्डित करने वाला और सुशील छात्रों से प्राणों की तरह स्नेह करने वाला हो, सत्योपदेश से सुख फैलाने वाला, सोम्यस्वभाव वाला, जिसको देखकर शिष्य भयभीत न होता हो, सद्विद्या के प्रकाश से सत्यधर्म का प्रकाश करने वाला हो, और सुख-प्रापक उपदेशों का सदा उपदेष्टा होना चाहिए ।। १६ । २ ।।

परमेष्ठी वा कुत्सः । **रुद्रः=राजा** । विराडार्ष्यनुष्टुप् । गान्धारः ।।

अथ राजपुरुषैः किं कर्त्तव्यमित्याह ।।

अब राजपुरुषों को क्या करना चाहिए, यह उपदेश किया है ।।

यामिषुं गिरिशन्त हस्ते बिभर्ष्यस्तवे । शिवां गिरित्र तां कुरु मा हिंसीः पुरुषं जगत् ।। ३ ।।

पदार्थः—(याम्) (इषुम्) बाणावलिम् (**गिरिशन्त**) गिरिणा=मेघेन शं तनोति तत्सम्बुद्धौ (**हस्ते**) (**बिभर्षि**) धरसि (**अस्तवे**) असितुं=प्रक्षेप्तुम् । अत्र अस धातोस्तुमर्थे तवेन् प्रत्ययः (**शिवाम्**) मङ्गलकारिणीम् (**गिरित्र**) गिरीन्=विद्योपदेशकान् मेघान् वा त्रायते=रक्षति तत्सम्बुद्धौ (**ताम्**) (**कुरु**) (**मा**) निषेधे (**हिंसीः**) हिंस्याः (**पुरुषम्**) पुरुषार्थयुक्तम् (**जगत्**) संसारम् ।। ३ ।।

प्रमाणार्थ—(**अस्तवे**) असितुम्=प्रक्षेप्तुम् । यहाँ 'अस्' धातु से 'तुमर्थ' में तवेन् प्रत्यय है ।।

अन्वयः—हे गिरिशन्त सेनापते ! यतस्त्वमस्तवे यामिषुं हस्ते बिभर्षि । अतस्तां शिवां कुरु । हे गिरित्र ! त्वं पुरुषं जगन्मा हिंसीः ।। ३ ।।

सपदार्थान्वयः—हे **गिरिशन्त** !=सेनापते गिरिणा=मेघेन शं तनोति तत्सम्बुद्धौ ! **यतस्त्वमस्तवे** असितुं=प्रक्षेप्तुं **यामिषुं** बाणावलिं **हस्ते बिभर्षि** धरसि, **अतस्तां शिवां** मङ्गलकारिणीं **कुरु**।

हे **गिरित्र** ! गिरीन्=विद्योपदेशकान् मेघान् वा त्रायते=रक्षति तत्सम्बुद्धौ ! **त्वं पुरुषं** पुरुषार्थ-युक्तं **जगत्** संसारं **मा न हिंसीः** हिंस्याः ॥ १६। ३॥

भाषार्थ—हे (गिरिशन्त) गिरि=मेघ से शान्ति का विस्तार करने वाले सेनापति ! तू—(अस्तवे) फैंकने के लिए (याम्) जिस (इषु) बाणावली को (हस्ते) हाथ में (बिभर्षि) धारण करता है, उसे (शिवाम्) मङ्गलकारी (कुरु) कर।

हे (गिरित्र) गिरि=विद्या के उपदेशकों वा मेघों के रक्षक सेनापति ! तू—(पुरुषम्) पुरुषार्थी (जगत्) संसार की (मा) मत (हिंसीः) हिंसा कर ॥ १६। ३॥

[**हे गिरिशन्त !**···**इषुं हस्ते बिभर्षि**, ··· **त्वं पुरुषं जगन्मा हिंसीः, शिवां कुरु**]

भावार्थः—राजपुरुषैर्युद्धविद्यां बुध्वा शस्त्राणि धृत्वा मनुष्यादयः श्रेष्ठाः प्राणिनो नो हिंसनीयाः, किन्तु मङ्गलाचारेण रक्षणीयाः ॥

भावार्थ—राजपुरुष, युद्ध-विद्या को जान कर, शस्त्रों को धारण करके मनुष्य आदि श्रेष्ठ प्राणियों की हिंसा न करें, किन्तु मङ्गल आचार से रक्षा करें॥ १६। ३॥

भा० पदार्थः—इषुम्=शस्त्रम्। पुरुषम्=मनुष्यादिश्रेष्ठप्राणिनम्।

भाष्यसार—**राज-धर्म**—रुद्र=राजा युद्ध-विद्या को जानने वाला हो, उसके बाणादि शस्त्रास्त्र का प्रयोग मेघ के समान सुखों की वर्षा, कल्याण तथा शान्ति के लिए हो, वह सत्यविद्या के उपदेशकों का पालक और पुरुषार्थी मनुष्यों का कभी विघात न करने वाला हो। किन्तु मंगलाचार से सदा रक्षा करने वाला हो ॥ १६। ३॥

परमेष्ठी। **रुद्रः**=**चिकित्सकः**। निचृदार्ष्यनुष्टुप्। गान्धारः॥

अथ चिकित्सककृत्यमाह ॥

अब वैद्य के कृत्य का उपदेश किया जाता है॥

शिवेन वचसा त्वा गिरिशाच्छा वदामसि। यथा नः सर्वमिज्जगदयक्ष्मꣳ सुमना ऽअसत् ॥ ४ ॥

पदार्थः—(**शिवेन**) कल्याणकारकेण (**वचसा**) वचनेन (**त्वा**) त्वाम् (**गिरिश**) यो गिरिषु=पर्वतेषु मेघेषु वा शेते तत्सम्बुद्धौ (**अच्छ**) सम्यक्। **निपातस्य चेति दीर्घः** (**वदामसि**) वदेम (**यथा**) (**नः**) अस्माकम् (**सर्वम्**) (**इत्**) एव (**जगत्**) मनुष्यादिकं जङ्गमं राज्यम् (**अयक्ष्मम्**) यक्ष्मादिरोगरहितम् (**सुमनाः**) शोभनं मनो यस्य सः (**असत्**) स्यात् ॥ ४॥

प्रमाणार्थ—(**अच्छ**) यहाँ 'निपातस्य च' (६। ३। १३६) से मन्त्र में दीर्घ है॥

अन्वयः—हे गिरिश रुद्र वैद्यराज ! सुमनास्त्वं यथा नः सर्वं जगदयक्ष्ममसत् तथेच्छिवेन वचसा त्वा वयमच्छवदामसि॥ ४॥

सपदार्थान्वयः—हे **गिरिश** ! यो गिरिषु=पर्वतेषु मेघेषु वा शेते तत्सम्बुद्धौ **रुद्र**=वैद्यराज ! **सुमनाः** शोभनं मनो यस्य स त्वं, **यथा**

भाषार्थ—हे (गिरिश) गिरि=पर्वतों वा मेघों में शयन करने वाले (रुद्र) वैद्यराज ! (सुमनाः) उत्तम मन वाला तू है। (यथा) जैसे

सपदार्थान्वयः—हे रुद्र ! यः प्रथमः आदिमः दैव्यः देवेषु=विद्वत्सु भवः **अधिवक्ता** सर्वेषामुपर्य्यधिष्ठातृत्वेन वर्त्तमानः सन् वैद्यकशास्त्रस्याध्यापकः **भिषक्**निदानादिविज्ञानेन रोगनिवारकः **भवान् सर्वान्** अखिलान् **अहीन्=रोगान्** सर्पवत् प्राणान्तकान् रोगान् **च जम्भयन्** औषधैर्निवारयन् **अध्यवोचत्** उपदिशेत् ।

स त्वं **याश्च सर्वा यातुधान्यः** रोगकारिण्यो व्यभिचारिण्यश्च स्त्रियः **अधराचीः** या अधरान्=नीचानञ्चन्ति ताः **सन्ति, ताश्च परासुव** दूरे प्रक्षिप ॥ १६ । ५ ॥

भाषार्थ—हे (रुद्र) दुष्टों को रुलाने वाले वैद्य ! जो (प्रथमः) पहला, (दैव्यः) देव=विद्वानों में विराजमान, (अधिवक्ता) सबके ऊपर अधिष्ठाता होकर वैद्यक शास्त्र के अध्यापक (भिषक्) निदान आदि के विज्ञान से रोग के निवारक आप—(सर्वान्) सब (अहीन्) सर्प के समान प्राणों के घातक रोगों को (जम्भयन्) औषधों से निवारण करते हुए (अध्यवोचत्) उपदेश कीजिए ।

सो तू—जो (सर्वाः) सब (यातुधान्यः) रोगकारी व्यभिचारिणी स्त्रियाँ (अधराचीः) नीचों का सत्कार करती हैं उन्हें (परासुव) दूर कर ॥

[यः प्रथमो दैव्योऽधिवक्ता भिषक् भवान् सर्वानहीन् च जम्भयन्]

भावार्थः—राजादिसभासदः सर्वेषामधिष्ठातारं मुख्यं धार्मिकं लब्धसर्वपरीक्षं वैद्यं राज्ये सेनायां च नियोज्य बलसुखनाशकान् रोगान्—

भावार्थ—राजा आदि सभासद् सब के अधिष्ठाता, मुख्य, धार्मिक, सब परीक्षाओं को प्राप्त वैद्य को राज्य और सेना में नियुक्त करके बल और सुख के नाशक रोगों को,

[याश्च······यातुधान्योऽधराचीः सन्ति ताश्च परासुव]

व्यभिचारिणो जनान् व्यभिचारिणीः स्त्रीश्च निवारयेयुः ॥ १६ । ५ ॥

व्यभिचारी पुरुषों और व्यभिचारिणी स्त्रियों को निवारण करें ॥ १६ । ५ ॥

भा० पदार्थः—प्रथमः=मुख्यः । दैव्यः=धार्मिकः । अधिवक्ता=सर्वेषामधिष्ठाता । अहीन्=बलसुखनाशकान् रोगान् । यातुधान्यः=व्यभिचारिणो जनाः, व्यभिचारिण्यः स्त्रियश्च । परासुव=निवारय ॥

भाष्यसार—**अच्छे वैद्य के कर्त्तव्य**—वैद्य को वैद्यक-शास्त्र का पूर्ण ज्ञाता होना चाहिए । अपनी विद्या में सर्वश्रेष्ठ होकर सर्वोपरि होकर रहे । अधूरा वैद्य सदा हानिकारक होता है । रोगों के कारणों को जानकर सर्पवत् प्राणान्तक रोगों को औषधियों से समूल नष्ट करने वाला हो, मधुर-भाषण, प्राणी-मात्र की मङ्गल-कामना आदि दिव्य गुणों वाला होकर रोगों को उत्पन्न करने वाले दुराचरणादि को सदुपदेश से दूर करने वाला हो ॥ १६ । ५ ॥

प्रजापतिः । **रुद्रः=राजा** । निचृदार्षी पङ्क्तिः । पञ्चमः ॥

पुनः स एव राजधर्मः प्रोच्यते ॥

उसी राजधर्म का फिर उपदेश किया जाता है ॥

असौ यस्ताम्रोऽअरुणऽउत बभ्रुः सुमङ्गलः ।
ये चैनꣳ रुद्राऽअभितो दिक्षु श्रिताः सहस्रशोऽवैषाꣳ हेडऽईमहे ॥ ६ ॥

पदार्थः—(असौ) श्रुतविषयः (यः) (ताम्रः) ताम्रमिव कठिनाङ्गः । **अत्र अमितम्योर्दीर्घश्च ॥** उ० २ । १६ ॥ **अनेनायं सिद्धः** (अरुणः) अग्निरिव तीव्रतेजाः (उत) अपि (बभ्रुः) पिङ्गधूम्रवर्णः (सुमङ्गलः)

शोभनानि कल्याणकराणि कर्माणि यस्य सः (**ये**) (**च**) (**एनम्**) राजानम् (**रुद्राः**) शत्रूणां रोदयितारः शूरवीराः (**अभितः**) सर्वतः (**दिक्षु**) पूर्वादिषु (**श्रिताः**) सेवमानाः (**सहस्रशः**) असंख्याता=बहवः (**अव**) निषेधे (**एषाम्**) वीराणाम् (**हेडः**) अनादरकर्त्ता (**ईमहे**) याचामहे ॥ ६ ॥

प्रमाणार्थ—(ताम्रः) यहाँ 'अमितम्योदीर्घश्च' (उ० २ । १६) से यह रूप सिद्ध है ॥

अन्वयः—हे मनुष्याः ! योऽसौ ताम्रो हेडोऽरुणो बभ्रुरुत सुमङ्गलो भवेत् । ये च सहस्रशो रुद्रा अभितो दिक्ष्वेनं श्रिताः स्युरेषामाश्रयेण वयमवेमहे ॥ ६ ॥

सपदार्थान्वयः—हे मनुष्याः ! **योऽसौ** श्रुतविषयः **ताम्रः** ताम्रमिव कठिनाङ्गः, हेडः अनादरकर्त्ता **अरुणः** अग्निरिव तीव्रतेजाः, **बभ्रुः** पिङ्गधूम्रवर्णः उत अपि **सुमङ्गलः** शोभनानि कल्याणकराणि कर्माणि यस्य सः **भवेत्**, **ये च सहस्रशः** असंख्याता=बहवः **रुद्राः** शत्रूणां रोदयितारः शूरवीराः **अभितः** सर्वतः **दिक्षु** पूर्वादिषु **एनं** राजानं **श्रिताः** सेवमानाः **स्युरेषां** वीराणाम् **आश्रयेण वयमवेमहे** न याचामहे ॥ १६ । ६ ॥

भाषार्थ—हे मनुष्यो ! जो (असौ) वह राजा (ताम्रः) ताम्बे के समान कठिन अङ्गों वाला, (हेडः) अनादर करने वाला, (अरुणः) अग्नि के समान तीव्र तेज वाला, (बभ्रुः) भूरे वर्ण वाला, (उत) और—(सुमङ्गलः) उत्तम कल्याणकारी कर्म करने वाला हो, (ये च) और जो (सहस्रशः) असंख्य (रुद्राः) शत्रुओं को रुलाने वाले शूर वीर (अभितः) सब ओर से (दिक्षु) पूर्व आदि दिशाओं में (एनम्) इस राजा की (श्रिताः) सेवा करने वाले हों, (एषाम्) इन वीरों के आश्रय से हम (अव+ईमहे) याचना न करें ॥ १६ । ६ ॥

[हे मनुष्याः ! योऽसौ—अरुणः, बभ्रुः, सुमङ्गलः, ये च···एनं श्रिताः स्युः]

भावार्थः—हे मनुष्याः ! यो राजाऽग्निवद् दुष्टदाहकः, चन्द्रवच्छ्रेष्ठाह्लादको न्यायकारी, शुभलक्षणो, येऽस्येदृशा भृत्या राज्ये सर्वत्र वसन्तु, विचरन्तु वा समीपे वर्त्तन्ताम्,

भावार्थ—हे मनुष्यो ! जो राजा अग्नि के समान दुष्टों का दाहक, चन्द्र के समान श्रेष्ठों का आह्लादक, न्यायकारी, शुभ लक्षणों से युक्त हो और जो इसके ऐसे ही भृत्य राज्य में सर्वत्र निवास, विचरण वा समीप रहते हों,

[एषामाश्रयेण वयमवेमहे]

तेषां सत्कारेण तैर्दुष्टानां तिरस्कारं यूयं कारयत ॥ १६ । ६ ॥

उनके सत्कार से उनके द्वारा दुष्टों का तुम तिरस्कार कराओ ॥ १६ । ६ ॥

भा० पदार्थः—अरुणः=अग्निवद्दुष्टदाहकः (राजा) । बभ्रुः=चन्द्रवच्छ्रेष्ठाह्लादको न्यायकारी । सुमङ्गलः=शुभलक्षणः । अवेमहे+तिरस्कारं कारयामः ॥

भाष्यसार—राज-धर्म—रुद्रतुल्य राजा ताम्बे के समान दृढ़ अङ्गों वाला बभ्रु=भूरे वर्ण वाला, चन्द्रवत् श्रेष्ठों का आह्लादक, न्यायकारी, अग्नि के समान तेजस्वी, दुष्टों का अनादर करने वाला, सत्कर्मों का करने वाला हो । ऐसे गुण-विशिष्ट राजा का सब शूरवीर योद्धा सब ओर से आश्रय करके अनुशासन में रहते हैं ॥ १६ । ६ ॥

प्रजापतिः । **रुद्रः**=**सेनेशः** ॥ विराडार्षी पङ्क्तिः । पञ्चमः ॥

पुनस्तमेव विषयमाह ॥

राजधर्म का फिर उपदेश किया है ॥

असौ योऽवसर्पति नीलग्रीवो विलोहितः ।
उतैनं गोपा ऽ अदृश्रन्नदृश्रन्नुदहार्य्यः स दृष्टो मृडयाति नः ॥ ७ ॥

पदार्थः—(**असौ**) (**यः**) (**अवसर्पति**) दुष्टेभ्यो विरुद्धं गच्छति (**नीलग्रीवः**) नीलमणियुक्ता ग्रीवा यस्य सः (**विलोहितः**) विविधैः शुभगुणकर्मस्वभावै रोहितो=वृद्धः (**उत**) (**एनम्**) (**गोपाः**) रक्षका भृत्याः (**अदृश्रन्**) समीक्षेरन् (**अदृश्रन्**) पश्येयुः (**उदहार्य्यः**) या उदकं हरन्ति ताः (**सः**) (**दृष्टः**) स समीक्षितः (**मृडयाति**) सुखयतु (**नः**) अस्मान् सज्जनान् ॥ ७ ॥

अन्वयः—योऽसौ नीलग्रीवो विलोहितो रुद्रः सेनेशोऽवसर्पति यमेनं गोपा अदृश्रन्नुताप्युदहार्य्योऽदृश्रन् स दृष्टः सन् नोऽस्मान् मृडयाति ॥ ७ ॥

सपदार्थान्वयः—**योऽसौ नीलग्रीवः** नीलमणियुक्ता ग्रीवा यस्य सः **विलोहितः** विविधैः शुभगुणकर्मस्वभावै रोहितो=वृद्धः **रुद्रः सेनेशो ऽवसर्पति** दुष्टेभ्यो विरुद्धं गच्छति, **यमेनं गोपाः** रक्षका भृत्याः **अदृश्रन्** समीक्षेरन् **उत**=**अप्युदहार्यः** या उदकं हरन्ति ताः **अदृश्रन्** पश्येयुः ।

स दृष्टः स समीक्षितः **सन् नः**=**अस्मान्** अस्मान् सज्जनान् **मृडयाति** सुखयतु ॥ १६ । ७ ॥

भाषार्थ—(यः) जो (असौ) वह (नीलग्रीवः) नीलमणि से युक्त ग्रीवा=गर्दन वाला, (विलोहितः) विविध शुभ गुण, कर्म, स्वभाव से वृद्ध (रुद्रः) सेनापति (अवसर्पति) दुष्टों से विरुद्ध चलता है, (एनम्) इसे (गोपाः) रक्षक भृत्य (अदृश्रन्) देखते हैं (उत) और—(उदहार्यः) पानी लाने वाली स्त्रियाँ (अदृश्रन्) देखें ।

(स दृष्टः) वह देख-भाल करता हुआ (नः) हम सज्जनों को (मृडयाति) सुखी करे ॥

[योऽसौ······रुद्रः=सेनेशोऽवसर्पति, यमेनं गोपा अदृश्रन्, सः······नोऽस्मान् मृडयाति]

भावार्थः—यो दुष्टानां विरोधी श्रेष्ठप्रियो दर्शनीयः सेनापतिः सर्वाः सेना रञ्जयेत्, स शत्रून् विजेतुं शक्नुयात् ॥ १६ । ७ ॥

भावार्थ—जो दुष्टों का विरोधी, श्रेष्ठों का प्रिय, दर्शनीय सेनापति सब सेनाओं को प्रसन्न रखे वह शत्रुओं पर विजय कर सकता है ॥ ७ ॥

भाष्यसार—**सेनापति कैसा हो**—सेनापति रुद्र की तरह शत्रुओं को रुलाने वाला, श्रेष्ठों के लिए प्राणवत् प्रिय हो, वह विविध शुभ गुण, कर्म, स्वभाव वाला, नीलमणि से युक्त गर्दन वाला हो । वह जब शत्रुओं के विरुद्ध चलने लगे, तब उसके अङ्गरक्षक उसकी सब ओर से रक्षा किया करें । पानी की तरह निरन्तर बढ़ने वाली सेनाएँ सेनापति की देख-भाल किया करें । ऐसा सेनापति शत्रुओं को जीतकर सबको सुख देता है ॥ १६ । ७ ॥

प्रजापतिः । **रुद्रः**=**सेनापतिः** । देवता । निचृदार्ष्यनुष्टुप् । गान्धारः ॥

पुनस्तमेव विषयमाह ॥

राजधर्म का फिर उपदेश किया है ॥

नमोऽस्तु नीलग्रीवाय सहस्राक्षाय मीढुषे । अथो ये ऽ अस्य सत्वानोऽहं तेभ्योऽकरं नमः ॥ ८ ॥

पदार्थः—(**नमः**) अन्नम् (**अस्तु**) भवतु (**नीलग्रीवाय**) शुद्धकण्ठस्वराय (**सहस्राक्षाय**) सहस्रेषु भृत्येष्वक्षिणी यस्य तस्मै (**मीढुषे**) वीर्यवते (**अथो**) अनन्तरम् (**ये**) (**अस्य**) सेनापतेरधिकारे (**सत्वानः**) सत्वगुणबलोपेताः (**अहम्**) प्रजासेनापालनाधिकारेऽधिकृतोऽमात्यः (**तेभ्यः**) (**अकरम्**) कुर्याम् (**नमः**) पुष्कलमन्नादिकम् ॥ ८ ॥

अन्वयः—नीलग्रीवाय सहस्राक्षाय मीढुषे सेनापतये मद्दत्तं नमोऽस्तु । अथो येऽस्य सत्वानः सन्ति तेभ्योपि नमोऽहमकरं निष्पादयेयम् ॥ ८ ॥

सपदार्थान्वयः—नीलग्रीवाय शुद्धकण्ठस्वराय **सहस्राक्षाय** सहस्रेषु भृत्येष्वक्षिणी यस्य तस्मै **मीढुषे** वीर्यवते **सेनापतये मद्दत्तं नमः** अन्नम् **अस्तु** भवतु ।

अथो अनन्तरं **येऽस्य** सेनापतेरधिकारे **सत्वानः** सत्त्वगुणबलोपेताः **सन्ति, तेभ्योऽपि नमः** पुष्कलमन्नादिकम् **अहं** प्रजासेनापालनाधिकारेऽधिकृतोऽमात्यः **अकरं**=**निष्पादयेयं** कुर्याम् ॥ १६ । ८ ॥

भाषार्थ—(नीलग्रीवाय) शुद्ध कण्ठ-स्वर वाले, (सहस्राक्षाय) असंख्य भृत्यों पर दृष्टि रखने वाले, (मीढुषे) वीर्यवान्=बलवान् सेनापति के लिए मेरा दिया हुआ (नमः) अन्न (अस्तु) हो ।

(अथो) और-(ये) जो (अस्य) इस सेनापति के अधिकार में (सत्वानः) सत्त्वगुण के बल से युक्त हैं, (तेभ्यः) उन्हें भी (नमः) पुष्कल अन्न आदि को (अहम्) मैं प्रजा और सेना के पालन-अधिकार में नियुक्त मन्त्री (अकरम्) सिद्ध करूँ ॥ १६ । ८ ॥

[**नीलग्रीवाय···सेनापतये मद्दत्तं नमोऽस्तु,···येऽस्य सत्वानः···तेभ्योऽपि नमोऽहमकरम्**]

भावार्थः—सभापत्यादिभिरन्नाद्येन यादृशः सत्कारः सेनापतेः क्रियते तादृगेव सेनास्थानां भृत्यानामपि कर्त्तव्यः ॥ १६ । ८ ॥

भावार्थ—सभापति आदि लोग अन्न आदि से जैसा सत्कार सेनापति का करते हैं वैसा ही सेना के भृत्यों का भी करें ॥ १६ । ८ ॥

भा० पदार्थः—सत्वानः=सेनास्था भृत्याः ॥

भाष्यसार—**राज-धर्म का वर्णन**—राजा का मुख्य धर्म यह है जो शुद्ध-स्वर वाला, (जिसकी ध्वनि स्पष्ट तथा ऊँची हो असंख्य सैनिकों तथा भृत्यों पर जो समान दृष्टि रखकर उनकी सब चेष्टाओं को जानता हो, और बलवान् यशस्वी हो, ऐसे पुरुष को सेनापति पद पर नियुक्त करे और उसका तथा उसके सत्त्वगुण वाले भृत्यों का पुष्कल अन्नादि से सत्कार करे ॥ १६ । ८ ॥

प्रजापतिः । **रुद्रः**=**सेनापतिः** । भुरिगार्ष्युष्णिक् । ऋषभः ॥

पुनस्तदेवाह ॥

राजधर्म का फिर उपदेश किया है ॥

प्रमुञ्च धन्वनस्त्वमुभयोरार्त्न्योर्ज्याम् । याश्च ते हस्त ऽ इषवः ऽ परा ता भगवो वप ॥ ९ ॥

पदार्थः—(**प्र**) प्रकृष्टार्थे (**मुञ्च**) त्यज (**धन्वनः**) धनुषः (**त्वम्**) सेनेशः (**उभयोः**) (**आर्त्न्योः**) पूर्वापरयोः (**ज्याम्**) बाणसन्धानार्थम् (**याः**) (**च**) (**ते**) तव (**हस्ते**) करे (**इषवः**) बाणाः (**परा**) दूरे (**ताः**) (**भगवः**) ऐश्वर्ययुक्त (**वप**) निक्षिप ॥ ९ ॥

अन्वयः—हे भगवः सेनापते ! ते तव हस्ते या इषवः सन्ति ता धन्वन उभयोरार्त्न्योर्ज्यामनुसन्धाय शत्रूणामुपरि त्वं प्रमुञ्च याश्च स्वोपरि शत्रुभिः प्रक्षिप्तास्ताः परा वप ॥ ९ ॥

सपदार्थान्वयः—हे **भगवः**=**सेनापते** ! ऐश्वर्ययुक्त ! **ते**=**तव हस्ते** करे **या इषवः** बाणाः **सन्ति**, **ता धन्वनः** धनुष **उभयोरार्त्न्योः** पूर्वापरयोः **ज्यां** बाणसन्धानार्थम् **अनुसन्धाय शत्रूणामुपरि त्वं** सेनेशः **प्रमुञ्च** प्रकृष्टं त्यज ।

याश्च स्वोपरि शत्रुभिः प्रक्षिप्तास्ताः परा+वप दूरे निक्षिप ॥ १६ । ९ ॥

भाषार्थ—हे (भगवः) ऐश्वर्य से युक्त सेनापति ! (ते) तेरे (हस्ते) हाथ में (याः) जो (इषवः) बाण हैं (ताः) उन्हें (धन्वनः) धनुष की (उभयोः) दोनों (आर्त्न्योः) पूर्व-अपर के (ज्याम्) बाणसन्धानी डोर को खोज कर शत्रुओं के ऊपर (त्वम्) तू (प्रमुञ्च) छोड़ ।

(याश्च) और जो अपने ऊपर शत्रुओं ने बाण फेंके हैं (ताः) उन्हें (परा+वप) दूर हटा ।

[हे······सेनापते ! ते······या इषवः सन्ति ता······शत्रूणामुपरि······प्रमुञ्च, याश्च······शत्रुभिः प्रक्षिप्तास्ताः परावप]

भावार्थः—सेनापत्यादिभिर्धनुषा प्रक्षिप्तैर्बाणैः शत्रवो विजेतव्याः, शत्रुक्षिप्ताश्च निवारणीयाः ॥ १६ । ९ ॥

भावार्थ—सेनापति आदि लोग धनुष से फेंके हुए बाणों से शत्रुओं को जीतें, शत्रुओं से छोड़े हुए बाणों को निवारण करें ॥ १६ । ९ ॥

भाष्यसार—**युद्ध के समय सेनापति का कर्त्तव्य**—सब प्रकार के ऐश्वर्यों से सम्पन्न सेनापति युद्ध के समय दो बातों का विशेष ध्यान रक्खे—(१) शत्रु पर ठीक लक्ष्य बना कर बाणादि अस्त्रों को धनुष की प्रत्यञ्चा को पूरे बल से खींचकर छोड़े। (२) और शत्रु के छोड़े हुए बाणों को रोकने अथवा बीच में ही काटने का पूरा प्रयत्न करे। इस प्रकार शत्रु पर निश्चित विजय प्राप्त होती है ॥ १६ । ९ ॥

प्रजापतिः । **रुद्रः**=**सेनापतिः** । भुरिगार्ष्यनुष्टुप् । गान्धारः ॥

पुनस्तदेवाह ॥

राजधर्म का फिर उपदेश किया है ॥

विज्यं॒ धनुः॑ कप॒र्दिनो॒ विश॑ल्यो॒ बाण॑वाँ२ऽउ॒त। अने॑शन्नस्य॒ याऽइष॑वऽआ॒भुर॑स्य निष॒ङ्ग॒धिः ॥१०॥

पदार्थः—(**विज्यम्**) विगता ज्या यस्मात्तत् (**धनुः**) (**कपर्द्दिनः**) प्रशंसितो जटाजूटो विद्यते यस्य तस्य (**विशल्यः**) विगतानि शल्यानि यस्य सः (**बाणवान्**) बहवो बाणा विद्यन्ते यस्य स (**उत**) यदि (**अनेशन्**) नश्येयुः । **णश् अदर्शने । लुङि रूपम् । नशिमन्योरलिट्येत्वं वक्तव्यम् । अनेन वार्त्तिकेनात्रैत्वम्** (**अस्य**) सेनापतेः (**याः**) (**इषवः**) बाणाः (**आभुः**) रिक्तः खड्गादिरहितः (**अस्य**) (**निषङ्गधिः**) निषङ्गानि=शस्त्रास्त्राणि धीयन्ते यस्मिन् सः ॥ १० ॥

प्रमाणार्थ—(अनेशन्) यह 'णश् अदर्शने' धातु का लुङ् लकार में रूप है। 'नशिमन्योरलिट्येत्वं वक्तव्यम्' (६ । ४ । १२०) इस वार्त्तिक से यहाँ एत्व है ।

अन्वयः—हे धनुर्वेदविदो जनाः ! अस्य कपर्दिनः सेनापतेर्धनुर्विज्यं मा भूदयं विशल्य आभुर्माभूत् । उतास्य शस्त्रास्त्रधारकस्य निषङ्गधिर्मृषा माभूत् । बाणवांश्चायं भवतु । या अस्येषवोऽनेशन् ता अस्मै नवा दत्त ॥ १० ॥

सपदार्थान्वयः—हे धनुर्वेदविदो जनाः ! **अस्य** सेनापतेः **कपर्दिनः=सेनापतेः** प्रशंसितो जटाजूटो विद्यते यस्य तस्य **धनुर्विज्यं** विगता ज्या यस्मात्तत् **मा भूत्, अयं विशल्यः** विगतानि शल्यानि यस्य सः **आभुः** रिक्तः= खड्गादिरहितः **मा भूत्।**

उत यदि **अस्य=शस्त्रास्त्रधारकस्य** सेनापतेः **निषङ्गधिः** निषङ्गानि=शस्त्रास्त्राणि धीयन्ते यस्मिन् **मृषा मा भूत् बाणवान्** बहवो बाणा विद्यन्ते यस्य स **चायं भवतु।**

या अस्य सेनापतेः **इषवः** बाणाः **अनेशन्** नश्येयुः, **ता अस्मै नवा दत्त** ॥ १६ । १० ॥

भाषार्थ—हे धनुर्वेद के वेत्ता पुरुषो ! (अस्य) इस (कपर्दिनः) प्रशंसित जटाजूट वाले सेनापति का (धनुः) धनुष (विज्यम्) डोरी से वियुक्त (मा भूत्) न हो। यह (विशल्यः) शल्य से रहित तथा (आभुः) खड्ग आदि से रहित (मा भूत्) न हो।

(उत) यदि—(अस्य) शस्त्र-अस्त्र को धारण करने वाले इस सेनापति का (निषङ्गधिः) शस्त्र-अस्त्रों को धारण करने वाली तूणीर (मृषा) व्यर्थ (मा भूत्) न हो। और यह—(बाणवान्) बहुत बाणों वाला हो।

(याः) जो (अस्य) इस सेनापति के (इषवः) बाण (अनेशन्) नष्ट हो जावें तो (ताः) वे इसे नये दो ॥ १६ । १० ॥

[अस्य कपर्दिनः=सेनापतेः धनुर्विज्यं मा भूत्, अयं...आभुर्माभूत्]

भावार्थः—युयुत्सुना नरेण धनुर्ज्यादयो दृढा बहुबाणाश्च धार्याः।

भावार्थ—युद्ध का इच्छुक नर धनुष की ज्या=डोरी आदि और बहुत से दृढ़ बाणों को धारण करे ॥

[या अस्येषवोऽनेशन्, ता अस्मै नवा दत्त]

सेनापत्यादिभिर्युध्यमानान् विलोक्य पुनश्च तेभ्यो बाणादीनि साधनानि देयानि ॥

सेनापति आदि युद्ध करने वालों को देखकर फिर उन्हें बाण आदि साधन प्रदान करें ॥

भाष्यसार—राज-धर्म—राजा को योग्य है कि वह प्राण-पण से युद्ध करते हुए रुद्र= सेनापति का, जिसका रूप युद्ध के समय प्रशंसा के योग्य होता है, इस प्रकार से ध्यान रक्खे कि उसका धनुष डोरी से रहित न हो, वह शल्य खड्गादि से रहित न हो, उसका तूणीर अपरिमित और प्रशस्त बाणों से सदा भरा रहे। युद्ध करते समय जो बाणादि अस्त्र नष्ट हो गये हों, उनके स्थान पर दूसरे नवीन अस्त्र यथासमय प्राप्त कराये जावें ॥ १६ । १० ॥

प्रजापतिः। **रुद्रः=सेनापतिः।** निचृदनुष्टुप्। गान्धारः ॥

सेनाधीशादयः कैः कथमुपदेश्या इत्युच्यते ॥

सेनापति आदि को कौन किस प्रकार उपदेश करें, यह उपदेश किया है।

या ते हेतिर्मीढुष्टम हस्ते बभूव ते धनुः। तयास्मान्विश्वतस्त्वमयक्ष्मया परि भुज ॥ ११ ॥

पदार्थः—(**या**) सेना (**ते**) तव (**हेतिः**) वज्रः। हेतिरिति वज्रना० ॥ निघं० ॥ २ । २० ॥ (**मीढुष्टम**) अतिशयेन वीर्यस्य सेचक सेनापते ! (**हस्ते**) (**बभूव**) भवेत् (**ते**) (**धनुः**) (**तया**) (**अस्मान्**) (**विश्वतः**) सर्वतः (**त्वम्**) (**अयक्ष्मया**) पराजयादिपीडानिवारकया (**परि**) समन्तात् (**भुज**) पालय ॥ ११ ॥

प्रमाणार्थ—(हेतिः) वज्रः । 'हेति' पद निघं० २ । २० ॥ में वज्र नामों में पठित है ॥

अन्वयः—हे मीढुष्टम सेनापते ! या ते सेनाऽस्ति । यच्च ते हस्ते धनुर्हेतिश्च बभूव । तयाऽयक्ष्मया सेनया तेन चास्मान् प्रजासेनाजनान् त्वं विश्वतः परि भुज ॥ ११ ॥

सपदार्थान्वयः—हे **मीढुष्टम !=सेनापते** अतिशयेन वीर्यस्य सेचक सेनापते ! **या सेना ते** तव **सेनाऽस्ति, यच्च ते हस्ते धनुर्हेतिः** वज्रः **च बभूव** भवेत्, **तयाऽयक्ष्मया** पराजयादिपीडानिवारकया **सेनया तेन चास्मान् प्रजासेनाजनान् त्वं विश्वतः** सर्वतः **परिभुज** समन्तात्पालय ॥ ११ ॥

भाषार्थ—हे (मीढुष्टम) वीर्य का अत्यन्त सेचन करने वाले सेनापति ! (या) जो (ते) तेरी सेना है, और जो (ते) तेरे (हस्ते) हाथ में (धनुः) धनुष है और (हेतिः) वज्र (बभूव) है, उस (अयक्ष्मया) पराजय आदि पीड़ा का निवारण करने वाली सेना से तथा उस धनुष आदि से हम प्रजा और सेना-जनों का तू (विश्वतः) सब ओर से (परिभुज) परिपालन कर ॥ १६ । ११ ॥

[**हे मीढुष्टम=सेनापते !······अस्मान् प्रजासेनाजनान् त्वं विश्वतः परिभुज**]

भावार्थः— विद्यावयोवृद्धैरुपदेशकैर्विद्वद्भिः सेनापत्यादय एवमुपदेष्टव्याः—

भवन्तो यावद्बलं तावता सर्वे श्रेष्ठाः सर्वथा रक्षणीया, दुष्टाश्च ताडनीया इति ॥ १६ । ११ ॥

भावार्थ—विद्यावृद्ध एवं वयोवृद्ध उपदेशक विद्वान् सेनापति आदि जनों को इस प्रकार उपदेश करें—

आप—यथाशक्ति सब श्रेष्ठ जनों की सर्वथा रक्षा और दुष्टों का ताड़न करें ॥ १६ । ११ ॥

भाष्यसार—**युद्धार्थ सन्नद्ध सेनापति को उपदेश**—हे सब प्रकार की शक्तियों से सम्पन्न सेनापति ! तुम्हारे हाथों में धनुष और वज्रादि अपरिमित शक्ति वाले हों । तुम्हारी सेना ऐसी दृढ़ और अभेद्य हो, जो पराजय रूपी पीड़ाओं का निवारण करके शत्रुओं से हमारी सब प्रकार से रक्षा करने में समर्थ हो ॥ १६ । ११ ॥

प्रजापतिः । **रुद्रः=सेनापतिः** । निचृदार्ष्यनुष्टुप् । गान्धारः ॥

राजप्रजाजनैरितरेतरं किं कार्यमित्युपदिश्यते ॥

राजा और प्रजा के पुरुषों को परस्पर क्या करना चाहिए, इस विषय का उपदेश किया है ॥

परि॑ ते॒ धन्व॑नो हे॒तिर॒स्मान्वृ॑णक्तु वि॒श्वतः॑ । अथो॒ य ऽ इ॑षु॒धिस्तवा॒रे ऽ अ॒स्मन्नि धे॑हि॒ तम् ॥१२॥

पदार्थः—(परि) (ते) तव (धन्वनः) (हेतिः) गतिः (अस्मान्) (वृणक्तु) परित्यजतु (विश्वतः) (अथो) आनन्तर्ये (यः) (इषुधिः) इषवो धीयन्ते यस्मिन् सः (तव) (आरे) समीपे दूरे वा (अस्मत्) अस्माकं सकाशात् (नि) (धेहि) नितरान्धर (तम्) ॥ १२ ॥

अन्वयः—हे सेनापते ! या ते धन्वनो हेतिरस्ति तथाऽस्मान् विश्वत आरे भवान् परिवृणक्तु । अथो यस्तवेषुधिरस्ति तमस्मच्चारे निधेहि ॥ १२ ॥

सपदार्थान्वयः—हे **सेनापते ! या ते** तव **धन्वनो हेतिः** गतिः **अस्ति, तयाऽस्मान् विश्वत आरे** समीपे दूरे वा **भवान् परिवृणक्तु** परित्यजतु ।

भाषार्थ—हे सेनापति ! जो (ते) तेरे (धन्वनः) धनुष की (हेतिः) गति है उससे (अस्मान्) हमें (विश्वतः) सब ओर से (आरे)

पास वा दूर आप (परिवृणक्तु) छोड़िए।

अथो अनन्तरं **यस्तवेषुधिः** इषवो धीयन्ते यस्मिन् सः **अस्ति, तमस्मद्** अस्माकं सकाशाद् **चाऽऽरे** समीपे दूरे **निधेहि** नितरान्धर ॥ १६ । १२ ॥

(अथो) और—(यः) जो (ते) तेरा (इषुधिः) बाणों को धारण करने वाला तूणीर है उसे (अस्मत्) हमारे (आरे) पास वा दूर (निधेहि) रखिए ॥ १६ । १२ ॥

[हे सेनापते !—यस्तवेषुधिरस्ति तमस्मदारे निधेहि]

भावार्थः— राजप्रजाजनैर्युद्धशस्त्राभ्यासं कृत्वा शस्त्रादिसामग्र्यः सदा समीपे रक्षणीयाः।

ताभिः परस्परस्य रक्षा कार्या, सुखं चोन्नेयम् ॥

भावार्थ—राजपुरुष और प्रजाजन युद्ध के शस्त्रों का अभ्यास करके शस्त्र आदि सामग्री को सदा समीप रखें।

उक्त सामग्री से एक-दूसरे की रक्षा करें और सुख को बढ़ावें ॥ १६ । १२ ॥

भा० पदार्थः—इषुधिः=शस्त्रादिसामग्री।

भाष्यसार—**सेनापति कैसा हो**—सेनापति उसे बनाना चाहिए जो स्वयं धनुषादि अस्त्र-शस्त्रों को चलाने में प्रशिक्षित हो। वह धनुर्वेद आदि का ऐसा विद्वान् होना चाहिए कि किस प्रकार के शस्त्रास्त्र दूर से अथवा निकट से शत्रु पर प्रहार कर सकते हैं। जो बाणादि को चारों तरफ फेंकने में पूर्ण प्रशिक्षित हो, उसका तूणीर बाणों से सदा भरा हुआ साथ रहना चाहिए ॥ १६ । १२ ॥

प्रजापतिः। **रुद्रः**=**सेनाध्यक्षः**। निचृदार्ष्यनुष्टुप्। गान्धारः स्वरः ॥

राजपुरुषैः कथं भवितव्यमित्याह ॥

राजपुरुषों को कैसा होना चाहिए, यह उपदेश किया है ॥

अवतत्य धनुष्ट्वᳬ सहस्राक्ष शतेषुधे। निशीर्य्यं शल्यानां मुखा शिवो नः सुमना भव ॥ १३ ॥

पदार्थः—(**अवतत्य**) विस्तार्य्य (**धनुः**) चापम् (त्वम्) (सहस्राक्ष) सहस्रेष्वसंख्यातेषु युद्धकार्येष्वक्षिणी यस्य तत्सम्बुद्धौ (**शतेषुधे**) शतमसंख्याः शस्त्रास्त्रप्रकाशा यस्य तत्सम्बुद्धौ (**निशीर्य**) नितरां हिंसित्वा (**शल्यानाम्**) शस्त्राणां (**मुखा**) मुखानि (**शिवः**) मङ्गलकारी (नः) अस्मभ्यम् (**सुमनाः**) सुहृद्भावः (**भव**) ॥ १३ ॥

अन्वयः—हे सहस्राक्ष शतेषुधे सेनाध्यक्ष ! त्वं धनुः शल्यानां मुखा चावतत्य तैः शत्रून्निशीय नः सुमनाः शिवो भव ॥ १३ ॥

सपदार्थान्वयः—हे **सहस्राक्ष** सहस्रेष्वसंख्यातेषु युद्धकार्येष्वक्षिणी यस्य तत्सम्बुद्धौ **शतेषुधे** !=**सेनाध्यक्ष** शतमसंख्याः शस्त्रास्त्रप्रकाशा यस्य तत्सम्बुद्धौ ! **त्वं धनुः** चापं **शल्यानां** शस्त्राणां **मुखा** मुखानि **चावतत्य** विस्तार्य्य **तैः शत्रून् निशीर्य** नितरां हिंसित्वा **नः** अस्मभ्यं **सुमनाः** सुहृद्भावः **शिवः** मङ्गलकारी **भव** ॥ १६ । १३ ॥

भाषार्थ—हे (सहस्राक्ष) सहस्र=असंख्य युद्ध कार्यों पर दृष्टि रखने वाले, (शतेषुधे) शत=असंख्य शस्त्र-अस्त्रों के प्रकाश वाले, सेनाध्यक्ष ! तू—(धनुः) धनुष और (शल्यानाम्) शस्त्रों के (मुखा) मुखों को (अवतत्य) विस्तृत करके, उनसे शत्रुओं की (निशीर्य) सर्वथा हिंसा करके, (नः) हमारे लिए (सुमनाः) श्रेष्ठ मन वाला तथा

(शिवः) मङ्गलकारी (भव) हो ॥ १६ । १३ ॥

[हे सहस्राक्ष शतेषुधे=सेनापते ! त्वं धनुः, शल्यानां मुखा चावतत्य तैः शत्रून् निशीर्य नः सुमनाः शिवो भव]

भावार्थः—राजपुरुषाः सामदामदण्डभेदादि-राजनीत्यवयवकृत्यानि सर्वतो विदित्वा, पूर्णानि शस्त्रास्त्राणि सम्पाद्य, तीक्ष्णीकृत्य च शत्रुषु दुर्मनसो दुःखप्रदाः, प्रजासु सोम्याः सुखप्रदाश्च सततं स्युः ॥ १६ । १३ ॥

भावार्थ—राजपुरुष साम, दाम, दण्ड, भेद आदि राजनीति के अवयव सम्बन्धी कार्यों को सब ओर से जानकर, पूर्ण शस्त्र-अस्त्रों को सिद्ध करके और उन्हें तीक्ष्ण करके, शत्रुओं के प्रति दुष्ट मन वाले, दुःखदायक हों तथा प्रजा के प्रति सोम्य-स्वभाव और सुखदायक सदा हों ॥

भा० पदार्थः—सहस्राक्ष=सर्वतो विदितसामदामदण्डभेदादिराजनीत्यवयवकृत्य । शतेषुधे=सम्पादितपूर्णशस्त्रास्त्र । सुमनाः=सोम्यः । शिवः=सुखप्रदः ।

भाष्यसार—**सेनापति के कर्त्तव्य**—सेनापति का मुख्य कर्त्तव्य यह है कि वह असंख्य युद्ध के कार्यों पर तथा योद्धाओं पर अपनी दृष्टि रक्खे । जिससे कोई कार्य पराजय का कारण न बन सके । असंख्य शस्त्रास्त्रों के चलाने में वह स्वयं भी प्रशिक्षित हो, और शस्त्रों के मुखों को विस्तृत=तीक्ष्ण करके शत्रुओं का संहारक बने । वह शत्रुओं के लिए दुर्मना और श्रेष्ठ प्रजा के लिए सुमना तथा कल्याणकारी होकर रहे ॥ १६ । १३ ॥

प्रजापतिः । **रुद्रः=सेनापतिः** । भुरिगार्ष्युष्णिक् । ऋषभः ॥

पुनस्तदेवाह ॥

राजपुरुषों को कैसा होना चाहिए, यह फिर उपदेश किया है ॥

नम॑स्त ऽ आयु॑धायाना॑तताय धृ॒ष्णवे॑ । उ॒भाभ्या॑मु॒त ते॒ नमो॑ बा॒हुभ्यां॒ तव॒ धन्व॑ने ॥ १४ ॥

पदार्थः—(नमः) (ते) तुभ्यम् (आयुधाय) यः समन्ताद् युध्यते तस्मै । **अत्र इगुपधेति कः** (अनातताय) अविद्यमान आततो=विस्तारो यस्य तस्मै (धृष्णवे) यो धृष्णोति=धाष्टर्य्यं प्राप्नोति तस्मै (उभाभ्याम्) (उत) (ते) तुभ्यम् (नमः) (बाहुभ्याम्) बलवीर्य्याभ्याम् (तव) (धन्वने) ॥ १४ ॥

प्रमाणार्थ—(आयुधाय) यहाँ 'इगुपधज्ञाप्रीकिरः कः' (३ । १ । १३५) से क—प्रत्यय है ॥

अन्वयः—हे सभेश ! आयुधायानातताय धृष्णवे ते नमोऽस्तु उत ते भोक्त्रे तुभ्यं नमः प्रयच्छामि । तवोभाभ्यां बाहुभ्यां धन्वने नमो नियोजयेयम् ॥ १४ ॥

सपदार्थान्वयः—हे **सभेश** ! **आयुधाय** यः समन्ताद् युध्यते तस्मै **अनातताय** अविद्यमान आततो=विस्तारो यस्य तस्मै **धृष्णवे** यो धृष्णोति=धाष्टर्य्यं प्राप्नोति तस्मै **ते** तुभ्यं **नमोऽस्तु, उत ते** तुभ्यं **भोक्त्रे तुभ्यं नमः प्रयच्छामि, तवोभाभ्यां बाहुभ्यां** बलवीर्य्याभ्यां **धन्वने नमो नियोजयेयम्** ॥ १६ । १४ ॥

भाषार्थ—हे सभापति ! (आयुधाय) सब ओर से युद्ध करने वाले, (अनातताय) विस्तार से रहित, (धृष्णवे) धृष्टता=दृढ़ता को प्राप्त हुए (ते) आपके लिए (नमः) अन्न हो । (उत) और (ते) तुझ भोक्ता के लिए (नमः) अन्न प्रदान करता हूँ । और—(तव) तेरे (उभाभ्याम्) दोनों (बाहुभ्याम्) बल और वीर्य के लिए तथा (धन्वने)

धनुष के लिए (नमः) अन्न को लगाऊँ ॥ १६ । १४ ॥

[हे सभेश !...... ते उभाभ्यां बाहुभ्यां धन्वने नमो नियोजयेयम्]

भावार्थः—सेनापत्याद्यधिकारिभिरुभयेभ्यो ऽध्यक्षयोद्धृभ्यः शस्त्राणि दत्त्वा शत्रुभिः सहैते निःशंकं सम्यग् योधनीयाः ॥ १६ । १४ ॥

भावार्थ—सेनापति आदि अधिकारी को अध्यक्ष और योद्धा दोनों के लिए शस्त्रों को देकर शत्रुओं के साथ निशंक होकर ठीक-ठीक युद्ध में प्रवृत्त करें ॥ १६ । १४ ॥

भाष्यसार—सेनापति कैसा हो—सेनापति शत्रुओं को चारों ओर से घेर कर युद्ध करने वाला हो। वह सेना का अनावश्यक विस्तार न करके दृढ़ता से शत्रुओं से युद्ध करे। उसकी दोनों भुजाओं में इतना बल हो कि वह शत्रुओं को बाधित=पराजित करने में समर्थ हो। ऐसे धनुषधारी सेनापति का सभापति आदि सभी राजपुरुष अन्नादि से सत्कार किया करें ॥ १६ । १४ ॥

कुत्सः । **रुद्रः**=युद्धसेनाधिकृतविद्वान् । निचृदार्षी जगती । निषादः ॥

राजजनैः किं न कार्यमित्याह ॥

राजपुरुषों को क्या नहीं करना चाहिए, यह उपदेश किया है ॥

मा नो महान्तमुत मा नो ऽ अर्भकं मा न ऽ उक्षन्तमुत मा न ऽ उक्षितम् ॥
मा नो वधीः पितरं मोत मातरं मा नः प्रियास्तन्वो रुद्र रीरिषः ॥ १५ ॥

पदार्थः—(मा) निषेधार्थे (नः) अस्माकम् (महान्तम्) महागुणविशिष्टं पूज्यं जनम् (उत) अपि (मा) (नः) (अर्भकम्) अल्पं क्षुद्रम् (मा) (नः) (उक्षन्तम्) वीर्य्यसेक्तारम् (उत) (मा) (नः) (उक्षितम्) सिक्तम् (मा) (नः) (वधीः) हिंस्याः (पितरम्) पालकं जनकम् (मा) (उत) (मातरम्) मान्यप्रदां जननीम् (मा) (नः) (प्रियाः) स्त्र्यादेः प्रीत्युत्पादकानि (तन्वः) शरीराणि (रुद्र) युद्ध-सेनाधिकृतविद्वन् (रीरिषः) हिंस्याः । **अत्र लिङर्थे लुङडभावश्च** ॥ १५ ॥

प्रमाणार्थ—(रीरिषः) यहाँ लिङर्थ में लुङ् और अडागम का अभाव है।

अन्वयः—हे रुद्र ! त्वं नो महान्तं मा वधीरुत नोऽर्भकं मा वधीर्न उक्षन्तं मा वधीरुत न उक्षितं मा वधीः । नः पितरं मा वधीरुत नो मातरं च मा वधीः । नः प्रियास्तन्वो मा रीरिषः ॥ १५ ॥

सपदार्थान्वयः—हे रुद्र ! युद्धसेनाधिकृतविद्वन् । त्वं नः अस्माकं **महान्तं** महागुणविशिष्टं पूज्यं जनं **मा न वधीः** हिंस्याः, **उत** अपि **नः** अस्माकम् **अर्भकम्** अल्पं क्षुद्रं **मा न वधीः** हिंस्याः, **नः** अस्माकम् **उक्षन्तं** वीर्य्यसेक्तारं **मा न वधीः** हिंस्याः, **उत** अपि **नः** अस्माकम् **उक्षितं** सिक्तं **मा न वधीः** हिंस्याः, **नः** अस्माकं **पितरं** पालकं जनकं **मा न वधीः** हिंस्याः, **उत** अपि **नः** अस्माकं **मातरं** मान्यप्रदां जननीं **च मा न वधीः** हिंस्याः ।

भाषार्थ—हे (रुद्र) युद्ध-सेना में अधिकृत विद्वान् ! तू—(नः) हमारे (महान्तम्) महान् गुणों से युक्त पूज्य जन का (मा वधीः) वध मत कर, (उत) और—(नः) हमारे (अर्भकम्) छोटे बच्चे का (मा वधीः) वध मत कर, (नः) हमारे (उक्षन्तम्) वीर्य सेचन में समर्थ युवा का (मा वधीः) वध मत कर, (उत) और—(नः) हमारे (उक्षितम्) गर्भ में सिक्त वीर्य का (मा वधीः) वध मत कर, (नः) हमारे (पितरम्) पालक पिता का (मा वधीः) वध मत कर, (उत) और—(नः)

हमारी (मातरम्) मान के योग्य जननी का (मा वधीः) वध मत कर,

नः अस्माकं **प्रियाः** स्त्र्यादेः प्रीत्युत्पादकानि **तन्वः** शरीराणि **मा** न **रीरिषः** हिंस्याः ॥१६।१५॥

और—(नः) हमारे (प्रियाः) स्त्री आदि के प्रीति-उत्पादक (तन्वः) शरीरों की (मा रीरिषः) हिंसा मत कर ॥ १६ । १५ ॥

[हे रुद्र ! त्वं नो **महान्तं, अर्भकम्, उक्षन्तं उक्षितं, मातरं, पितरं च मा वधीः, नः प्रियास्तन्वो मा रीरिषः**]

भावार्थः—योद्धृभिर्युद्धसमये कदाचिद् वृद्धा, बालका, अयोद्धारो युवानो, गर्भा, योद्धृणां मातरः पितरश्च, सर्वेषां स्त्रियः संप्रेक्षितारो, दूताश्च नो हिंसनीयाः, किन्तु—सदा शत्रुसम्बन्धिनो वशे स्थापनीयाः ॥ १६ । १५ ॥

भावार्थ—योद्धा लोग युद्ध के समय वृद्धों, बालकों, युद्ध न करने वाले युवकों, गर्भों, योद्धाओं के माता-पिता, सबकी स्त्रियों, दर्शकों और दूतों का कभी वध न करें; किन्तु—सदा शत्रुओं के सम्बन्धियों को वश में रखें ॥ १६ । १५ ॥

भा० पदार्थः—महान्तम्=वृद्धम् । अर्भकम्=बालकम् । उक्षन्तम्=अयोद्धारं युवानम् । उक्षितम्=गर्भम् । मातरम्=योद्धृणां मातरम् । पितरम्=योद्धृणां पितरम् । प्रियाः=सर्वेषां **स्त्रियः** ॥

अन्यत्र व्याख्यात—(क) मा नो वधीः पितरं मोत मातरम् । ··· माता, पिता, आचार्य और अतिथि की सेवा करना देवपूजा कहाती है । (**सत्यार्थ० समु० १०**) ॥

(ख) हे रुद्र ! (**दुष्टों को पाप के दुःखरूप फल को दे के रुलाने वाले परमेश्वर !**) आप हमारे छोटे बड़े जन, गर्भ, माता, पिता और प्रिय बन्धु वर्ग तथा शरीरों का हनन करने के लिए प्रेरित मत कीजिए; ऐसे मार्ग से हमको चलाइए जिससे हम आप के दण्डनीय न हों ॥ **सत्यार्थ० समु० ७** ॥

भाष्यसार—**सेनापति युद्ध में किस किस को न मारे**—युद्ध के समय सेनापति आदि योद्धा गण शत्रुओं का संहार करें, किन्तु जो गुणों में महान् हैं, छोटे बच्चे हैं, युद्ध न करने वाले युवाजन हैं, गर्भस्थित जीव हैं, योद्धाओं के माता, पिता, स्त्रियां तथा इष्ट बन्धु हैं, और दूत का कार्य करने वाले हैं, उन पर कदापि प्रहार न करे । १६ । १५ ॥

कुत्सः । **रुद्रः=सेनेशः** । निचृदार्षी जगती । निषादः ॥

पुनस्तदेवाह ॥

राजपुरुषों को क्या नहीं करना चाहिए, यह उपदेश किया है ॥

मा नस्तोके तनये मा नऽ आयुषि मा नो गोषु मा नोऽ अश्वेषु रीरिषः ।
मा नो वीरान् रुद्र भामिनो वधीर्हविष्मन्तः सदमित् त्वा हवामहे ॥ १६ ॥

पदार्थः—(**मा**) (नः) अस्माकम् (**तोके**) सद्योजातेऽपत्ये (**तनये**) पञ्चमाद्वर्षादूर्ध्वं वयः प्राप्ते (**मा**) (नः) अस्माकम् (**आयुषि**) वयसि (**मा**) (नः) अस्माकम् (**गोषु**) गोऽजाव्यादिषु (**मा**) (**नः**) (**अश्वेषु**) तुरङ्गहस्त्युष्ट्रादिषु (**रीरिषः**) हिंसको भवेः (**मा**) (नः) (**वीरान्**) शूरान् (**रुद्र**) (**भामिनः**) क्रुद्धान् (**वधीः**) (**हविष्मन्तः**) बहूनि हवींषि=दातुमादातुं योग्यानि वस्तूनि विद्यन्ते येषां ते (**सदम्**) यो न्याये सीदति तम् (**इत्**) एव (**त्वा**) त्वाम् (**हवामहे**) स्वीकुर्महे ॥ १६ ॥

अन्वयः—हे रुद्र सेनेश ! त्वं नस्तोके मा रीरिषो नस्तनये मा रीरिषो न आयुषि मा रीरिषो नो गोषु मा रीरिषो नोऽश्वेषु मा रीरिषः नो भामिनो वीरान् मा वधीरतो हविष्मन्तो वयं सदं त्वेद्धवामहे ॥ १६ ॥

सपदार्थान्वयः—हे रुद्र !=सेनेश ! **त्वं नः** अस्माकं **तोके** सद्योजातेऽपत्ये **मा रीरिषः** हिंसको भवेः, **नः** अस्माकं **तनये** पञ्चमाद्वर्षादूर्ध्वं वयः प्राप्ते **मा रीरिषः**, **न आयुषि** वयसि **मा रीरिषः**, **नो गोषु** गोऽजाव्यादिषु **मा रीरिषः नोऽश्वेषु** तुरङ्गहस्त्युष्ट्रादिषु **मा रीरिषः**, **नो भामिनः** क्रुद्धान् **वीरान्** शूरान् **मा वधीः** ।

भावार्थ—हे (रुद्र) सेनापति ! तू—(नः) हमारे (तोके) नवजात शिशु का (मा रीरिषः) हिंसक मत हो, (नः) हमारे (तनये) पाँच वर्ष से अधिक आयु के बालक का (मा रीरिषः) हिंसक मत हो, (नः) हमारी (आयुषि) आयु का (मा रीरिषः) हिंसक मत हो, (नः) हमारी (गोषु) गौ, बकरी भेड़ आदि के (मा रीरिषः) हिंसक मत हो, (नः) हमारे (अश्वेषु) घोड़े, हाथी, ऊँट आदि के (मा रीरिषः) हिंसक मत हो, (नः) हमारे (भामिनः) क्रुद्ध (वीरान्) शूर-वीरों को (मा वधीः) वध मत कर ।

अतो हविष्मन्तः बहूनि हवींषि=दातुमादातुं योग्यानि वस्तूनि विद्यन्ते येषां ते **वयं सदं** यो न्याये सीदति तं **त्वा** त्वाम् **इत्** एव **हवामहे** स्वीकुर्महे ॥ १६ । १६ ॥

इसलिए-(हविष्मन्तः) बहुत देने-लेने योग्य वस्तुओं वाले हम लोग-(सदम्) न्यायाध्यक्ष (त्वा) तुझे (इत्) ही (हवामहे) स्वीकार करते हैं ॥

[हे रुद्र=सेनेश ! त्वं नस्तोके, तनये, गोषु, अश्वेषु मा रीरिषः नो वीरान् मा वधीः]

भावार्थः—राजपुरुषैः कस्यापि प्रजास्थस्य स्वस्य वा बालकुमारगवाश्वादिवीरहत्या नैव कार्या,

भावार्थ—राजपुरुष—किसी प्रजा-जन के अथवा अपने बालक, कुमार, गौ, अश्व आदि पशु और वीर पुरुष की हत्या न करें ।

[न आयुषि मा रीरिषः]

न बाल्यावस्थायां विवाहेन व्यभिचारेण चायुर्हिंसनीयम् ।

और—बाल्यावस्था में विवाह करके व्यभिचार से आयु की हिंसा न करें ।

[तात्पर्यमाह—]

गवादिपशूनां दुग्धादिप्रदानेन सर्वोपकारकत्वात् सदैवैतेषां वृद्धिः कार्या ॥ १६ । १६ ॥

गौ आदि पशु दुग्ध आदि देने के कारण सब के उपकारक हैं अतः सदैव इनकी वृद्धि करें ॥

भा० पदार्थः—तोके=बाले । तनये=कुमारे । गोषु=गवादिषु । अश्वेषु=अश्वादिषु ।

भाष्यसार—**युद्ध में अवध्य प्राणियों का वर्णन**—युद्ध के समय सेनापति आदि योद्धागण, नवजात शिशुओं पर, अल्पवयस्क बालकों पर, गाय, बकरी, घोड़े आदि उपकारक पशुओं पर, युद्ध में रत क्रुद्ध वीरों पर कभी प्रहार न करें । ऐसे वध्यों का वध और अवध्यों की रक्षा करने वाले सेनापति का सब हृदय से स्वागत करते हैं ॥ १६ । १६ ॥